दिनांक 7-12-20 शास्त्री तृतीयखण्ड, विषय-व्याकरण
ग्रन्थ - न्यायसिद्धान्तमुक्तावली, अनुमानखण्डम्

प्रश्न- पूर्वपक्षव्याप्तिज्ञानं सयुक्तिकं लेख्यम्:

उत्तर- उपाद्योपपादकभावः उपोद्घातः। संगतिरिति एव बोध्या सप्रसङ्गः। उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते इत्यभियुक्तोक्तेः। तत्र व्याप्तिः का इति प्रश्नः संगच्छते।

व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः। साध्यवत्पदं लक्षणया साध्यवत् ~~प्रतियोगिकपरं~~ प्रतियोगिपरं तथा च भेदसम्बन्धेन अन्यपदार्थैकदेशे ~~भेदे~~ भेदेऽन्वयः; न तु साध्यवत्पदार्थस्य प्रतियोगितासम्बन्धेन भेदे नामार्थयोर्भेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। भेदवत्त्वञ्च सप्तम्यर्थ निरूपितत्वसम्बन्धेन वृत्तिस्वरूपे सम्बन्धपदार्थे तस्य च प्रतियोगितासम्बन्धेनाभावे। एवं च साध्यवत्प्रतियोगिकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरिति तदर्थः।

वह्निमान् धूमादित्यादौ साध्यो वह्निः साध्यवान् महानसादिः तद्भिन्नो जलह्रदादि तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिंस्तप्तायःपिण्डादौ वह्नेः सत्त्वान्नाऽतिव्याप्तिः।

अत्र येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन साध्यवान् बोध्यः: अन्यथा समवायसम्बन्धेन वह्निमान् वह्न्यवयवः तदन्यो महानसादिः तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसङ्गात्।

अर्थात् साध्यतावच्छेदकसम्बन्धावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेदकतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः। एवं च समवायेन इति प्रतीतिसाक्षिकभेदीयप्रतियोगितावच्छेदकता वह्निनिष्ठा सा च न साध्यतावच्छेदकसम्बन्धावच्छिन्ना या च साध्यतावच्छेदकसम्बन्धावच्छिन्ना संयोगेन वह्निमान्नेति भेदीया प्रतियोगितावच्छेदकता तन्निरू[illegible]पकप्रतियोगिताकभेदश्च पर्वत इति नाव्याप्तिः।

साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः तेन यत्किञ्चित् वह्निमतो महानसादेर्भिन्नो पर्वतादौ

दिनांक 7-12-20 शास्त्री तृतीयखण्ड, विषय-व्याकरण
ग्रन्थ-न्यायसिद्धान्तमुक्तावली, अनुमानखण्डम्

प्रश्न- पूर्वपक्षव्याप्ति लक्षणं समुचितं लेख्यः

उत्तर- उपाद्योपपादकभावः उपोद्घातः। संगतिः इत्यवोचाम सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते इत्यभियुक्तोक्तेः। तत्र व्याप्तिः का इति प्रश्नः संगच्छते।

व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः। साध्यवत्पदलक्षणया साध्यवत्प्रतियोगिकत्वस्य भेदसम्बन्धेन अन्यपदार्थे भेदेऽन्वयः; न तु साध्यवत्पदार्थस्य प्रतियोगिता सम्बन्धेन भेदे नामार्थयोरभेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। भेदवत्त्वं च स्वार्थ निरूपितत्व सम्बन्धेन वृत्तिस्वरूपे सम्बन्धपदार्थे तस्य च प्रतियोगिता सम्बन्धेनाभावे। एवं च साध्यवत्प्रतियोगिकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरिति तदर्थः।

वह्निमान् धूमादित्यादौ साध्यो वह्निः साध्यवान् महानसादिः तद्भिन्नः जलह्रदादि तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिन् अयःपिण्डादौ वह्नेः सत्त्वान्नाऽतिव्याप्तिः।

अत्र येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन साध्यवान् बोध्यः अन्यथा समवाय सम्बन्धेन वह्निमान् वह्न्यवयवः तदन्यो महानसादिः तत्र धूमस्य विद्यमानत्वाद् व्याप्तिप्रसङ्गात्।

अर्थात् साध्यतावच्छेदकसम्बन्धावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेदकतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः। एवं च समवायेन इति प्रतीतिसाक्षिकभेदीय प्रतियोगितावच्छेदकता वह्निनिष्ठा सा च न साध्यतावच्छेदकसम्बन्धावच्छिन्ना या च साध्यतावच्छेदकसम्बन्धावच्छिन्ना संयोगेन वह्निमान्नेति भेदीया प्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिताकभेदश्च पर्वत इति नाव्याप्तिः।

साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः तेन यत्किञ्चित् वह्निमतो महानसाद् भिन्नो पर्वतादौ